International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 26-27
© 2017 IJSR
www.anantaajournal.com
Received: 09-11-2016
Accepted: 10-12-2016

संजयकुमार
शोधच्छात्रः श्री.ला.ब.शा.रा.सं. विद्यापीठम्

**Correspondence**
संजयकुमार
शोधच्छात्रः श्री.ला.ब.शा.रा.सं. विद्यापीठम्

# वेदान्तदर्शने जीवस्वरूपविमशः

**संजयकुमार**

अस्मिन् जीवस्वरूपविचारः क्रियते। षोडशवान् लिङ्गी चेतनया युक्तो जीवः। अङ्गुष्ठमात्रमज्जोपहितं चैतन्यमङ्गुष्ठामानकं हृदिस्थं जीवसंज्ञितं भवति। उक्तञ्च –

> ''मज्जोपहितचैतन्यं हृदिस्थं जीवसंज्ञितम्। मज्जापित्तं धातुसारं जीवाख्यान्तं प्रचक्षते।।
> एषचेतनया युक्तो जीव इत्यभिधीयते। अंगुष्ठमात्रमज्जोपहितं अंगुष्ठमानकम्।।[1]

स्वयं ज्योतिस्वरूपो देवमायया मोहितस्स सुखदुःखायान्यनुभवति। यथा कर्म यथा श्रुत कर्मानुगुणं जन्म उत्तमाधमयोनिप्रवेशं च करोति स जीवः। पुनः मरणं पुनः जन्म सर्वेषामनर्थानामपनुपये योगाभ्यासो भक्तिसमाधिश्च करणीयाः, गुरुमुखात् निदिध्यासनं ज्ञात्वा समाधिकालं स्वानन्दरसिको भूत्वा ब्रह्मरूपञ्जगत्पश्यन् निरतिशयानन्दमनुभवति।

> ''तेषु केचिन्महात्मानः सन्ति ते न्यायवादिनः।
> ये वदन्ति निदिध्यासान्मुक्तिं स च गुरोर्मुखात्।। समाधेस्साधनमिति ज्ञानं यच्छास्त्रसंभवम्।
> निदिध्यासानभिज्ञान्स्वान्धन्या नात्रसंशयः।।''[2]

ब्रहमविन्निधौः जीवस्वरूपकथनम्, प्रकरणे, श्लोक संख्या-3ए4
अणुत्वे सति चैतन्यं, शेषत्वे सति चैतन्यमित्यादीनि जीवसामान्यलक्षणानि भवन्ति। जीवश्च देहेन्द्रियमनप्राणधीभ्यो विलक्षणो भवति। ''मम शरीरम्'' 'चक्षुषा पश्यामि' 'वाचा वदामि' मनसा जानामि 'मम प्राणा' जानाम्यहमित्यादि व्यावहारिकप्रतीत्यैव वैलक्षण्यं प्रतीयते। 'स्वरुपोऽणुरपि' स्वधर्मभूतज्ञानव्याप्त्या युगपदनेकविषयानुभवभाग्भवति। 'उत्क्रान्तिगत्यागतीनाम्'[3] स्वात्मना चोत्तरयो''[4] 'नाणुरतच्छुतेरिति चेन्नेतराधिकारात्''[1] ''स्वशब्दोन्मानाभ्यां च''[2] इत्यादि सूत्रैः जीवस्याणुस्वरूपत्वं सिद्धान्तिम् श्रुतयश्चोत्कान्त्यादिविषयाः- 'तेनप्रद्योतेनैव आत्मा निष्क्रामिति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः;' ये वै केचनास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति'[3] ''तस्माल्लोकात् पुरेत्यस्मै लोकाय कर्मणे''[4] साक्षादणुत्वप्रतिपादकश्रुतयश्च
''एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश''[5] ''बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः''[6] पुर्वानुभूतार्थ प्रतिसन्धानच्चायं जीवो नित्यः । ''आत्मा श्रुतेर्नित्यत्वाच्च ताभ्यः''[7]अत्र श्रुतिप्रमाणानि-
''न जायते म्रियते वा विपश्चित्''[8] ''नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विद्धाति कामान्''[9], 'अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते ऽहन्यमाने शरीरे'[10] अयं जीवः प्रतिशरीरं भिन्नः स्वयंप्रकाशश्च। तस्यैकत्वव्यवहारस्तु ब्रीहिराशौ चेको वीहिरिति
प्रतीतिवत् ज्ञानैकाकारतया वर्तते, न तु स्वरुपैक्यात्। स्वरूपतो

ज्ञानानन्दस्वरूपयोप्युपाधिवशात् सेसरति। कर्तृत्वभोक्तृत्वशरीरत्वादयोऽस्य भवन्ति। बद्धजीवपरकश्रतयश्च –

''समाने वृक्षे पुरूषो निमग्नोऽनीशया शोचति मुह्यमान:''[11]
''द्वा सुपर्णा सखुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्य: पिप्पं स्वादवत्यनश्नन् चान्योऽभिचाकशीति।[12]

इत्याद्या: स्वकर्मानुगुणञ्च बद्धजीवा: विविधयोविप्रवेशभाजा: भवन्ति। श्रुतयश्चात्र ''साधुर्भवति, पापकारीपापो भवति, पुण्य: पुण्येन कर्मणा पाप: पापेन''[13] ''तद्येह रमणीयाचरणाभ्यासो ह यत्तो रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रियपयोनिं वा वैयसोनिंवा सूकरयोनिंवा वा चाण्डालयोनिं वा''[14] बद्धश्च शास्त्रवश्यतदवश्यभेदेन द्विविध: वर्तते। शास्त्रवश्याश्च करणायत्तज्ञानबद्धा:। यत् 'ब्रह्म सत्यं जगन्मिथ्या' जीवो ब्रह्मैव नापर:'' अस्यायमभिप्रायो , यत् संसारस्य कोऽपि पदार्थ: तदैव सुखदो जायते

यदा स आत्मन: संस्पर्शं लभते। यतोहि– आत्मीयत्वेन अनुभूयमानस्य परकीयस्य सुन्दरस्यापि वस्तुन: सुखजनकत्वं न भवति। अत: स्पष्टमिदं मन्तव्यं यत् संसारस्य कश्चन विषय: स्वयं सुखं न जानयति। किन्तु तस्य सुखजनपितृत्वम् आत्मसम्पर्कादेवात्मापि सच्चिदानन्दरूप:। तस्य सत्ताया: चेतनाया: आनन्दस्य च आभासमात्रप्रापणेनैव जगतोविषया: सत्तां प्रकाशमानता आनन्दप्रदत्तां च आसादयन्ति। यथोक्तम् –

''एषोऽस्य परम आनन्द: एतस्यैव आनन्दस्य अन्यानि भूतानि मात्रा उपजीवति'' तदनुसारेण मानवस्य आत्मैव आनन्द:। अन्येषु वस्तुषु अस्य आत्मानन्दस्य अंशमात्रमेव प्रतिद्योत्यते। आत्मन: आनन्दमयत्त्वासाधिका युक्तिरियं प्रश्नोपनिषदि इत्थं प्रतिपादित यत् ''अत्रैषदेव: स्वप्नान् न पश्यति। अथ तदैतस्मिन् शरीरे एत्तसुखं भवति।' तैत्तिरीयोपनिषदि आत्मन: सद्रूपत्वं चिदरुपत्वं आनन्दरूपत्वं च बोधयितु इदमुक्तम्। ''को हि अन्यात् क: प्राण्यात् यद्येष आकाश आनन्दो न स्यात्''[15] तमेनमात्मानं वृहदारण्यकश्रुति: अविनाशिनम् अनुच्छित्तिधर्मा। इति।

आत्मन: सर्वाधिक प्रियत्वम् उपनिषत्सु अनेकत्र प्रतिपादितम्। यथा – ''तदेतत् प्रेय: पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्यात् सर्वस्मात्''[16]

''न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवति।[17] तदेवं उपनिषद् वचतै: युक्तिभिश्च आनन्दात्मा उपपद्यमान: आत्मैव जीवात्मा। नाऽयं

ब्रह्मणो भिन्न:। ब्रह्मैव अवीद्यया आवृतम् आविधकेन अन्त: करणेन अविच्छिन्नं सद् अल्पज्ञाताम् अनीश्वरतां सुखदु:खादिकं च समाश्रयद् जीवशब्देन उच्यते।

''जीवब्रह्मणेरभेद: उपनिषत्सु प्रतिपादित:।'' बृहदारण्यके तृतीयाध्याये चतुर्थब्राह्मणे चाक्रायणं याज्ञवल्क्येन स्पष्टमुक्तयत् – ''य: प्राणेन प्राणिति स त आत्मा सर्वान्तर:। योऽपानेन अपानिति स त आत्मा सर्वान्तर:। य उदानेन उदानिति स त आत्मा सर्वान्तर:। यो व्यानेन व्यानिति स त आत्मा सर्वान्तर:।[18] जाग्रदवस्थायां जीव: स्थूलशरीरमय: अन्नमयकोशाच्छन्नश्च भवति अस्याम् अवस्थायां जीव: 'विश्व' शब्देन संज्ञितो भवति। स्वानावस्थायां जीव: सूक्ष्मशरीरेण युक्त: मनोमयविज्ञानमयप्राणमयकोशैश्च आच्छन्नो

भवति। अस्याम् अवस्थायां स ''तेजस'' शब्देन संज्ञायते।

सुषुप्त्यवस्थायां जीव: अज्ञानात्मकेन कारणशरीरेण विशिष्ट:

आनन्दमयकोशाच्छन्नश्च भवति। अस्याम् अवस्थायां स ''प्राज्ञ'' शब्देन उच्यते। अविद्यादिनाम् अनादितया ब्रह्मणो जीवभावोऽपि अनादि:। स च भाव: ब्रह्मण:

अखण्डापरोक्षसाक्षात् कारलक्षणाया: विद्याया: उदये अविद्यादीनां ध्वंसात् नश्यति।

शङ्कराचार्येण ब्रह्मसूत्रभाष्ये परस्यात्मनो ब्रह्मण: शरीररूपजीवताया: औपाधिकत्वं जीवानां ब्रह्मत्वम् अविद्याविनाशे जीवभावस्य अपगतिश्च भवतीति स्पष्टं प्रतिपादितम् तथाहि – ''पर एव आत्मा देहेन्द्रिय मनो बुद्धयाद्युपाधिभि: परिच्छिद्यमानो बालै:

शरीरइत्युपयर्यते । ''सर्वेषाम् नामरूपकृकार्यकारणसंघात प्रविष्टानां जीवानां ब्रह्मत्वम्''।

## संदर्भ ग्रंथ


1. ब्रहमविन्निधाै जीवस्वरूपकथनम्, प्रकरणे, श्लोक संख्या–23,24
2. ब्र. सू. 2/3/20
3. ब्र.सु.2/3/21
4. ब्र.सु.2/3/22
5. ब्र.सु.2/3/23
6. बृ.उ.6/4/2
7. कौषि.उ.1/2
8. बृ.उ. 6/4/6
9. मु.उ.3/1/9
10. श्वेता.उ.5/8
11. ब्र.सू.2/3/18
12. श्वेता.उ.5/9
13. श्वेता.उ.6/13
14. मु.उ.3/1/92
15. मु.उ.3/1/1
16. वृ.उ.4/4/5
17. छा.उ.5/10/7
18. तै.उ.3,अ–07
19. बृ.उ.अ.4/8
20. (बृ.उ.अ.4/5/6)
21. (वृ.उ.3, 4)